याम् "स्यादाभ्युदयिकं श्राद्धं वृद्धियुक्तेषु कर्म्मसु। पुंसवनसीमन्तचौलोपनयनेष्विह। विवाहे चानलाधेयप्रभृतिश्रौतकर्म्मणि। इदं श्राद्धं प्रकुर्वन्ति द्विजा वृद्धिनिमित्तकम्। अन्यैः षोड़शसंस्कारसरण्यादिषूपोष्यते। वाप्याद्युद्यापनादौ तु कुर्युः पूर्त्तनिमित्तकम्" वोपदेवकालादर्शौ "सोमन्तव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च। पुंस्त्वत्यावसथप्रवेशनसुताद्यास्यावलोकाश्रमस्वीकारक्षितिपाभिषेकदयिताद्यर्त्तौ च नान्दीमुखम्" श्राद्धकौमुद्यां निर्णयामृते च मात्स्ये "अन्नप्राशे च सोमन्ते पुत्रोत्पत्तिनिमित्तके। पुंसवे च निषेके च नववेश्मप्रवेशने। देववृक्षजलादोनां प्रतिष्ठायां विशेषतः। तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम्। तत्र गर्भाधाने आभ्युदयिकं छन्दोगेतरपरं यथोक्तं श्राद्धतत्त्वे छन्दो॰प॰। वृषोत्सर्गे वृद्धिश्राद्धं काम्य विषयम्। अशौचान्तद्वितीयदिनादिविहिते न वृद्धिश्राद्धमिति भेदः। "असकृद्यानि कर्म्माणि क्रियेरन् कर्म्मकारिणा। प्रतिप्रयोगं नैव स्युर्मातरः श्राद्धमेव च। आधाने होमयज्ञे च वैश्वदेवे तथैव च। बलिकर्म्मणि दर्शे च पौर्णमासे तथैव च। नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः। एकमेव भवेत् श्राद्धमेतेषु न पृथक् पृथक्। नाष्टकासु भवेत् श्राद्धं न श्राद्धे श्राद्धमिष्यते। न सोष्यन्तीजातकर्म्म प्रोषितागतकर्म्मसु। विवाहादिः कर्म्मगणो य उक्तो गर्भाधानं शुश्रम यस्य चान्ते। विवाहादावेकमेवात्र कुर्य्यात् श्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात्। तथागणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत्। सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु। यत्र यत्र भवेत् श्राद्धं तत्र तत्रैव मातरः"। इदं चावश्यकम्। "वृद्धौ न तर्पिताये वै पितरो गृहमेधिभिः। तद्धीनमफलं ज्ञेयमासुरोविधिरेव स" इति शातातपोक्तेः। "अष्टकामास्याभ्युदयास्तीर्थपात्रोपपत्तयः। पितॄणामतिरेकोऽयं मासिकान्नात्ध्रुवः स्मृत इति देवी॰पु॰उक्तेश्च ध्रुव आवश्यक इति श्रा॰त॰ रघु॰। अत्र श्राद्धत्रयमाह शाता॰। "मातृश्राद्धं तु पूर्व्वं स्यात् पितॄणां तदनन्तरम् ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम्" तत्कालमाह पृथ्वीचन्द्रोदये गार्ग्यः "मातृश्राद्धं तु पूर्व्वेद्युः कर्माहनि तु पैतृकम्। मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतम्"। अत्राप्यशक्तौ स एव "पृथक्दिनेष्वशक्तश्चेदेकस्मिन् पूर्व्ववासरे। श्राद्धत्रयं प्रकुर्व्वीत वैश्वदेवं तु तान्त्रिकमिति" वृद्धमनुरपि "अत्रा-

भेऽभिन्नकालानां नान्दीश्राद्धत्रयं बुधः पूर्व्वेद्युर्वै प्रकुर्व्वीत पूर्व्वाह्णे मातृपूर्व्वकम्" अत्र "महत्सु पूर्व्वेद्युस्तदहस्त्वेष्विति" गृह्यपरिशिष्टव्यवस्था ज्ञेया। कर्म्मदिवस एवेति गौडाचारः। तच्च प्रातरेव। "पार्व्वणञ्चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति" निर्ण॰ सि॰ शातातपोक्तेः। अत्र प्रातःशब्दः सार्द्धप्रहरपरः "प्रहरोऽप्यर्धसंयुक्तः प्रातरित्यभिधीत इति" गार्ग्योक्तेरिति पृथ्वीचन्द्रोदयः। "आवर्त्तनसमीपे वेवा, इक्तेः मध्याह्नावधिरिति" गौडाः। इदं च पुत्रजन्मातिरिक्तविषयम् तदाहात्रिः "पूर्व्वाह्णे वैश्ववद्वृद्धिर्विना जन्मनिमित्तकम्। पुत्रजन्मनि कुर्व्वीतश्राद्धं तात्कालिकं बुध इति" एतदनियतनिमित्तपरम् "नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकम्। तेषामनियतत्वे तु तदानन्तर्य्यमिष्यत" इति लौगाक्षिस्मृतेः। आधानाङ्गं नान्दीश्राद्धं त्वपराह्णे एव "आमश्राद्धं तु पूर्व्वाह्णे सिद्धान्नेन तु मध्यतः। पार्व्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकमिति" निर्णयामृते गालवोक्तेः "नान्दीमुखादयः प्रातराग्निकं त्वपराह्णत" इति विष्णूक्तेश्च। इदं च मातृपितृमातामहादिक्रमेण छन्दोगेतरैः नवदैवत्यं कार्य्यम् तत्र मातामहादयस्तु सपत्नीकाः "मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानामिति" पृथ्वीचन्द्रोदये गद्यरूपेण गारुड़वाक्यात्। हेमाद्रौ शङ्खः "नान्दीमुखे सत्यवसू संकीर्त्यौ वैश्वदेविके"। वृद्धपराशरः "नान्दीखेभ्योदेवेभ्यः प्रदक्षिणकुशासनम्। पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृतिः"। श्राद्धे मालादाननिषेधेऽपि वृद्धौ मालाविशेषदानं विहितम्। "मालत्याः शतपत्राया मल्लिकाकुब्जयोरपि। केतक्याः पाठलाया वा देया माला न लोहिता" कू॰पु॰ उक्तेः। "कुशस्थाने च दूर्व्वाःस्युर्मङ्गलस्याभिवृद्धय" इति हेमा॰ ब्रह्मा॰ पु॰ "ऋजवोदर्भा इति प्रागुक्तं वाक्यं तु छन्दोगविषयम्। अत्राधिकारी निरूप्यते। "जातस्य जातकर्म्माणि क्रियाकाण्डमशेषतः। पिता पुत्रस्य कुर्व्वीत श्राद्धं चाभ्युदयात्मकम्" विष्णु॰पु॰। "स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्म्मसु। पिण्डानोद्वहनात् तेषां तदभावेऽपि तत्क्रमात्" छन्दोग॰। "जीवत्पितृकस्याप्यत्राधिकारः। अनग्निकोऽपि कुर्व्वीत जन्मादौ वृद्धिकर्म्मणि। येभ्य एव पिता दद्यात् तानेवोद्दिश्य तर्पयेदिति" हारीतोक्तेः "उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः। मैत्रायणपरिशिष्टम् "जीवतः जीवन्त